## अवक्षेपणे कन्। (९५/२०५०)

अवक्षिप्यते येन तदवक्षेपणम्। तस्मिन् वर्तमानात् प्रातिपदिकात् कन्प्रत्ययो भवति। व्याकरणकेन नाम त्वं गर्वितः। याज्ञिक्यकेन नाम त्वं गर्वितः। [1]परस्य कुत्सार्थं यदुपादीयते तदिहोदाहरणम्। यत् पुनः स्वयमेव कुत्सितं तत्र[2] 'कुत्सिते' (५.३.७४/२०२९) इत्यनेन कन्प्रत्ययो भवति, देवदत्तकः, यज्ञदत्तकः (म. भा. २.४२८) इति। प्रागिवीयस्य पूर्णो[3]ऽवधिः॥

## इवे प्रतिकृतौ। (९६/२०५१)

[4]कन् इत्यनुवर्तते। इवार्थे यत् प्रातिपदिकं [5]वर्तते तस्मात् कन् प्रत्ययो भवति। इवार्थः सादृश्यं, तस्य विशेषणं प्रतिकृतिग्रहणम्। प्रतिकृतिः प्रतिरूपकं, प्रतिच्छन्दकम्। अश्व इवायम् [6]अश्वप्रतिकृतिः अश्वकः। उष्ट्रकः। गर्दभकः। प्रतिकृतौ इति किम्? गौरिव गवयः॥

## सञ्ज्ञायां [7]च। (९७/२०५२)

[8]इव इत्यनुवर्तते, कन् इति च। इवार्थे गम्यमाने[9] कन्प्रत्ययो भवति, समुदायेन चेत् सञ्ज्ञा गम्यते। अप्रतिकृत्यर्थ[11] आरम्भः। [12]अश्वसदृशस्य सञ्ज्ञा अश्वकः। उष्ट्रकः। गर्दभकः॥

## लुम्मनुष्ये। (९८/२०५३)

सञ्ज्ञायाम् इत्येव। सञ्ज्ञायां विहितस्य कनो मनुष्येऽभिधेये लुब् भवति। [13]चञ्चेव मनुष्यः चञ्चा[14]। दासी। खरकुटी (म. भा. २.४२८)। मनुष्ये इति किम्? अश्वकः। उष्ट्रकः। गर्दभकः। देवपथादेराकृतिगणत्वात् तस्यैवायं प्रपञ्चो [15]वेदितव्यः॥

## जीविकार्थे चापण्ये। (९९/२०५४)

जीविकार्थं यदपण्यं तस्मिन्नभिधेये कनो लुप् भवति। [16]विक्रीयते यत् तत् [17]पण्यम्। वासुदेवः। शिवः। स्कन्दः। विष्णुः। आदित्यः। देवलकादीनां [18]जीविकार्था देवप्रतिकृतय उच्यन्ते। अपण्ये इति किम्? हस्तिकान् विक्रीणीते। [19]अश्वकान्। [20]रथकान्। देवपथादे[21]रेवायं प्रपञ्चः॥

## देवपथादिभ्यश्च। (१००/२०५५)

'इवे प्रतिकृतौ' (५.३.९६/२०५१), 'सञ्ज्ञायां च' (५.३.९७/२०५२)[22] विहितस्य कनो देवपथादिभ्य उत्तरस्य लुब् भवति। आदिशब्दः प्रकारे। आकृतिगणश्चायम्। देवपथः। हंसपथः[23]।

---

1. पुरुषस्य कुत्सायाम् क. 2. एव इत्यधिकम् फ. ह. 3. विधिः फ. 4. वाक्यमिदं नास्ति फ. 5. वर्तते नास्ति फ. 6. प्रतिरूपम् क. ड. 7. च नास्ति ग. 8. इव इति ड. 9. प्रातिपदिकात् इत्यधिकम् ड. 10. भवति फ. ह. 11. अयम् इत्यधिकम् क. 12. अश्वसादृश्यस्य ह. 13. वंश इव मनुष्यः वंशः क. 14. चञ्चा तृणमयः पुरुषः। तत्सदृशः पुरुषजातिः इत्यधिकम् फ, वधिका इत्यधिकम् क. ड. 15. वेदितव्यः नास्ति क. फ. 16. न इत्यधिकम् क. 17. अपण्यम् क. 18. जीविकार्थदेवताप्रतिकृतयः क. 19. अश्वकान् नास्ति ह. 20. रथिकान् विक्रीणीते ह, वासुदेवकान् विक्रीणीते ड. 21. आकृतिगणत्वात् तस्य इत्यधिकम् क. 22. इत्येव इत्यधिकम् ग. 23. वारिपथः इत्यधिकम् ड.